Reg. No. | | | | | | | | | |

# BASSKLN 201/HRDSKLN 201/BSWSKLN 201

## II Semester B.A./B.A. (HRD)/B.S.W. Degree Examination, September 2022
## (NEP-2020) (2021-22 Batch Onwards)
## SAMSKRUTAM
## Samskruta Language (AECC)

Time : 2 Hours Max. Marks : 60

***सूचना*** *: 1)* ***संस्कृत****भाषया,* ***कर्णाटक****भाषया* ***आंग्ल****भाषया वा उत्तराणि लिखत ।*

*2) प्रश्नसंख्या* ***IV*** *तथा* ***V*** *अनयोः उत्तराणि* ***संस्कृत****भाषया एव लेखनीयानि ।*

I. **एकस्य** गद्यस्य अनुवादं कृत्वा विवृणुत । **(1×5=5)**

1) कस्मिन्श्चिद्देशे धर्मबुद्धिः पापबुद्धिश्च द्वे मित्रे प्रतिवसतः । अथ कदाचित्पापबुद्धिना चिन्तितं यदहं तावन्मूर्खो दरिद्रश्च । तदेनं धर्मबुद्धिमादाय देशान्तरं गत्वा अस्याश्रयेणार्थोपार्जनं कृत्वैनमपि वञ्चयित्वा सुखी भवामीति । अथान्यस्मिन्नहनि पापबुद्धिर्धर्मबुद्धिमाह-'भो मित्र! शास्त्रेष्वेवं वर्णितं यद् येन देशान्तरेषु बहुविधभाषावेषादि न ज्ञातं तस्य जन्म धरणीपीठे निरर्थकम् । अत आवां देशान्तरं गच्छाव' इति ।

2) सर्वैः सह हनूमान् महेन्द्रपर्वतमारुह्य सूर्येन्द्रादिदेवगणान् भूतगणांश्चाभिवाद्य जन्मदातृपवनदेवस्मरणपूर्वकं प्राणवायुमवरुध्य स्फीतीभवितुमारभत । विशालभुजद्वयेन पर्वतमभिव्याप्य कटिचरणकर्णसंकोचपूर्वकं परब्रह्मश्रीरामचन्द्रस्य ध्यानं कृतवान् । ततः सर्वानुद्दिश्य जगाद-'रामपरित्यक्तामोघशरवत् अहमपि दूतकार्यसिद्ध्यर्थं आकाशमार्गेण गच्छामि । अद्यैव लङ्कां गत्वा सीतां द्रक्ष्यामि । यदि तत्र सीतां नावलोकयामि तर्हि समानवेगेनैव सुरलोकं यास्यामि' ।।

II. **चत्वारि** वाक्यानि सप्रसङ्गं विवृणुत । **(4×3=12)**

1) न वित्तं दर्शयेत् प्राज्ञः ।

2) सत्यं वद । धर्मं चर ।

3) प्राप्नोतु अयं वृक्षः भूतपूर्वं वैभवम् ।

4) अस्मदाश्रयेण त्वया कश्चिद्विश्रामः कर्तव्यः ।

5) नायं शिखण्डिना हतः, किन्तु पार्थेनैव ।

6) दत्तमिदम् प्राज्यं राज्यं भवते ।

III. **त्रीन्** प्रश्नान् प्रबन्धरूपेण उत्तरयत । **(3×8=24)**

1) अनुशासन पर्वणः सारं यथापाठ्यं लिखत ।

2) पापबुद्धेः कुटिलोपायं तत्परिणामं च विवृणुत ।

3) हनूमतः समुद्रोल्लङ्घनम् वर्णयत ।

4) यदुरायेण कृतं मारनायकस्य वधं वर्णयत ।

5) रामो नाम शुकस्य चरितं विवृणुत ।

IV. **एकं** संस्कृतेन टिप्पणीं लिखत । **(1×4=4)**

1) उपनिषत् 2) विष्णुशर्मा 3) महाभारतम्

V. निर्देशानुसारं **पञ्चदश**वाक्यानि पूरयत । **(15×1=15)**

अ) युक्तं कारकं विलिख्य वाक्यं पूरयत ।

1) यदुपतिः तीर्थयात्रार्थं प्रतस्थे । (कर्तृ, कर्म, करणम्)

2) सः पापबुद्धिं अवदत् । (कर्तृ, कर्म, करणम्)

3) चन्द्रापीडः अश्वात् पतति । (करणम्, अपादानम्, सम्प्रदानम्)

4) अहं मनसा ध्याये । (कर्तृ, करणम्, सम्प्रदानम्)

5) आकाशे नक्षत्राणि सन्ति । (कर्म, सम्प्रदानम् अधिकरणम्)

आ) वाक्यदोषं परिहरत ।

6) वृक्षस्य कोटरे अध्यास्त ।

7) रामं नमः ।

8) यदि भवान् सन्तुष्टः अयं मे वरो भव ।

9) अलं निर्बन्धे ।

10) भीष्मः गङ्गायाः पुत्रस्य नामः ।

इ) युक्तं समास नाम विलिख्य वाक्यं पूरयत ।

11) हृतं हृदयं यस्य सः हृतहृदयः । (बहुव्रीहिः, कर्मधारयः, अव्ययीभावः)

12) अनिलश्च अनलश्च अनिलानलौ । (तत्पुरुषः, अव्ययीभाव, द्वन्द्वः)

13) अन्यः वृक्षः वृक्षान्तरम् । (अव्ययीभाव, द्वन्द्वः, तत्पुरुषः)

14) न धर्मः अधर्मः । (द्वन्द्वः, कर्मधारयः, नञ् तत्पुरुषः)

15) पञ्चानां पात्राणां समाहारः पञ्चपात्रम् । (बहुव्रीहिः, तत्पुरुषः, द्विगुः)

ई) युक्तं सन्धि नाम विलिख्य वाक्यं पूरयत ।

16) देव + आलयः = देवालयः __________। (सवर्णदीर्घसन्धिः, यण्सन्धिः, गुणसन्धिः)

17) गङ्गा + उदकम् = गङ्गोदकम् __________। (गुणसन्धिः, सवर्णदीर्घसन्धिः, यण्सन्धिः)

18) वचनेन + एव = वचनेनैव __________। (यण्सन्धिः, गुणसन्धिः, वृद्धिसन्धिः)

19) पुनः + अयम् = पुनरयम् __________। (वृद्धिसन्धिः, विसर्गसन्धिः, गुणसन्धिः)

20) षट् + आननः = षडाननः __________। (जश्त्वसन्धिः, सवर्णदीर्घसन्धिः, यण्सन्धिः)